जातं सहस्रसंवत्सरिकम्" भा०अनु० ७२५७श्लो० । "वशिष्ठस्याश्रमपदं शून्यमासीन्महात्मनः । मुहूर्त्तमेव निःशब्दमासीदीरिणसन्निभम्" रामा० ।

**ईरिन्** त्रि० ईर–णिनि । १प्रेरके २गन्तरि च स्त्रियां ङीप् । स्वशब्दादस्य हृद्विरेका० स्वैरी स्वैरिणी । "रे रे स्वैरिणि ! निर्विचारकविते मास्मत् प्रकाशीभव" चन्द्रा० ३राजभेदे पु० । "धृतराष्ट्रांश्च कशतमशीतिर्जनमेजयाः । शतञ्च ब्रह्मदत्तानामीरिणाञ्च शतं तथा" भा० स० ८ ३० श्लो० यमसभासदर्शने

**ईर्क्ष्य** ईर्ष्यायां परवृद्ध्यसहिष्णुतायाम् भ्वा० पर० सक० सेट् । ईर्क्ष्यति ऐर्क्ष्यीत् । ईर्क्ष्याम् बभूव आस चकार । ईर्क्ष्यिता ईर्क्ष्यीत् ईर्क्ष्यिष्यति ऐर्क्ष्यिष्यत् । ईर्क्ष्या ।

**ईर्त्सा** स्त्री ऋध–सन्–अ । ऋद्धीच्छायाम् ।

**ईर्त्सु** त्रि० ऋध–सन्–उ । वर्द्धितुमिच्छौ ।

**ईर्म** न० ईर–मक् । व्रणे । ह्रस्वादिरयमिति बहवः पृषो० ह्रस्वः । अस्य पुंस्त्वमपि । "तदाङ्कुरीर्म इव वा एषां होत्रा यदच्छावाक्या" ता०ब्रा० ४,२,१० । "ईर्म इव वा एषा होत्राणां यदच्छावाकः" "ईर्म इव तुद्यमानाः" इति भाष्या० "तस्य प्राची दिक् शिरोऽसौ चासौ चेर्मावथास्य प्रतीची दिक् पुच्छम्" शत०ब्रा० १०,६,५०,३ । तेन "व्रणोऽस्त्रियामीर्ममरुः इत्यमरे ऽस्त्रियामिति संदंशपाठादुभयत्रान्वेतीति बोध्यम् । दक्षिणशब्दात् लुब्धयोगेन क्षतव्रणार्थे अस्मात् अनिच् दक्षिणेर्मा व्याधेन क्षतव्रणे मृगे । "मृगयुमिव मृगोऽथ दक्षिणेर्मा" भट्टिः । २प्रेरिते त्रि० "ईर्मान्तासः सिलिकमध्यमासः" ऋ० १,२०२,१० । ईर्मान्तास: ईर्माईरिताः प्रेरिता अन्तायेषां ते" भा० ।

**ईर्य्या** स्त्री ईर–ईर्ष्यायां कण्ड्वा० यक् लोपधत्वात् दीर्घःभावे अ स्त्रीत्वात् टाप् । १ईर्ष्यायाम् । ईर्य्यते ज्ञायते परात्माऽनया ईर–गतौ ण्यत् । २भिक्षुचर्य्यायाम् सा च ध्यानमौनादिकरूपा । "चर्या चेर्य्यापथे स्थितिः" अमरः । "कल्याणा पुनरियं प्रव्रजितस्यैर्य्या" ।

**ईर्य्यापथ** पु० ईर्य्यारूपः पन्था कर्म्मधा० अच् समा० । ध्यानमौनादिरूपे परिव्राजकस्य ज्ञानसाधनोपायभेदे ।

**ईर्वारु** पुंस्त्री० ईर–भावे सम्प० क्विप् ईरमीरणं वृणोति वारयति वा उण् । कर्कट्याम् शब्दर० ।

**ईर्ष्य** परगुणासहने भ्वा०पर०अक० सेट् । ईर्ष्यति ऐर्ष्यीत् । ईर्ष्याम्–बभूव आस चकार । ईर्ष्यिता ईर्ष्यिष्यति ऐर्ष्यिष्यत् । णिचि ईर्ष्ययति ते त ऐर्षियत् ऐर्षिष्यत् त । सनि ईर्ष्यिषिषति । ईर्ष्या ईर्ष्यितः । "पत्युर्वाङ्किमीर्ष्यितं प्रसवनं नायस्य चेहः स्त्रियाः" हितो० । ईर्ष्यितव्यम् । "तस्मात्ङ्किलुषु दाराणां क्रमशेषु नेर्ष्यितव्यमिति" प्रबो० ।

**ईर्ष्यक** त्रि० ईर्ष्य–ण्वुल् । १ईर्ष्याकारिणि । "दृष्ट्वा व्यवायमन्येषां व्यववाये यः प्रवर्त्तते । ईर्ष्यकः स तु विज्ञेयः" इति सुश्रुतोक्ते २क्लीवभेदे पु० । "आसेक्यश्च सुगन्धी च कुम्भीकश्चेर्ष्यकस्तथा । सरेतसस्त्वमी ज्ञेया अशुक्रः षण्डसंज्ञितः" सुश्रु० । क्लीवशब्दे विवृतिः ।

**ईर्ष्या** स्त्री ईर्ष्य–भावे अ स्त्रीत्वात् टाप् । अक्षमायाम् परवृद्ध्यसहिष्णुतायाम् । "पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम् । वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः" मनुः एतेषाञ्च क्रोधप्रभवत्वात् क्रोधजत्वम् अतएव "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः" पा० "द्रोहादयोऽपि कोपप्रभवा एव गृह्यन्तेऽतो विशेषणं सामान्येन यं प्रतिकोपः" सि०कौ० । "ईर्ष्याशोकक्षमायेता मोहमात्सर्य्यवर्ज्जिताः" भा० व० २६० "त्यक्तेर्ष्यस्त्यक्तमन्युश्च स्मयमानोऽब्रवीदिदम्" भा० अनु० २अ० । अयं शब्दोनिर्य्येकार इति केचित् "ईर्ष्यतेस्तृतीयस्येति" वार्त्ति० उक्तेः कविकल्पद्रुमे, पा० गणपाठे च यान्ततया पाठात् निर्य्येकारपाठे मूलं मृग्यम् । तेन सयकारएव साधीयान् ।

**ईर्ष्यालु** त्रि० ईर्ष्यां लाति ला–बा० डु । ईर्ष्यायुक्ते ।

**ईर्ष्यु** त्रि० ईर्ष्य–उण् । अक्षमाशीले "ईर्ष्युर्गन्धर्वराजो वै जलक्रीड़ासुपागतः" भा० आ० १७० अ० । "पर्य्यशङ्कत तामीर्ष्युः सुग्रीवगतमानसाम्" भा० २७९ अ० ।

**ईला** स्त्री ईड–क डस्य ल । १पृथिव्यां, २वाचि, ३गवि, च । अस्य ह्रस्वादित्वमेवेति बहवोमन्यन्ते शब्दार्थचिन्तामणौ तु दीर्घपाठः । तन्मूलं मृग्यम् ।

**ईलि(ली)** स्त्री ईर्य्यते ईर–इन् रस्य लः वा ङीप् । १करपालिकायाम् (काटारी) २हस्वगदाकारे हस्तदण्डे च । भरतः ।

**ईलित** त्रि० ईड–क्त डस्य लः । स्तुते अमरः ।

**ईलिन** पु० ईड–इनन् डस्य लः । चन्द्रवंश्ये नृपभेदे । "ईलिनं तु सुतं तंसुर्जनयामास वीर्य्यवान्" "ईलिनोजनयामास दुष्मन्तप्रभृतीन् नृपान्" भा० आ० ९३अ० । "तंसुं सरस्वती पुत्रं मतिनारादजीजनत् । ईलिनं जनयामास कालिङ्ग्यां तंसुरात्मजम्" । "ईलिनस्तु रथन्तर्य्यां दुष्मन्ताद्यान् पञ्चपुत्रानजीजनत्" भा० आ० ९५अ० ।

**ईवत्** त्रि० ई–गतौ भावे क्विप् अस्त्यर्थे मतुप् वेदे नि० मस्य वः । गतिमति "य ईवते ब्रह्मणे गातुरेरत" ऋ०